# संस्कृत-वार्ता:

दिनाङ्क : 22/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- विकास-परियोजनानां उद्घाटनाय, रेलयानानां हरित-ध्वजं प्रदर्शनाय च प्रधानमन्त्री नरेन्द्र मोदी श्वः केरल-राज्यं गमिष्यति।
- झारखण्ड-राज्ये सुरक्षाबलेन वरिष्ठः माओवादि-नेता अनल-दा इत्यमुं समेत्य दशाधिकाः माओवादिनः मारिताः।
- जम्मू-कश्मीर्-प्रदेशे डोडा-जनपदस्य खन्नी-टॉप इत्यत्र मार्गात् सैन्य-ट्रक्-यानम् अपक्रम्य खत्यां पतनेन दशसैनिकाः मृताः, एकादश जनाः च व्रणिताः।
- भारत-अमेरिका-देशयोः मध्ये वाशिङ्ग्टन-नगरे त्रिदिवसियं औषध-नीति-कार्यकारि-सम्मेलनम् समाप्तम्।
- बैडमिण्टन्-क्रीडायां भारतीय-क्रीडकौ पी. वी. सिन्धु, लक्ष्यसेन: च अद्य इण्डोनेशिया-मास्टर्स्-प्रतियोगितायाः प्रागुपान्त्यचक्रीय द्वन्द्वे प्रविष्टवन्तौ।

---------------------------------------------

<u>प्रधानमन्त्री केरल</u>

प्रधानमन्त्री नरेन्द्रमोदी श्वः केरल-राज्यं गमिष्यति, यत्र सः तिरुवनंतपुरं-नगरे अनेकासां विकास-परियोजनानां शिलान्यासं, उद्घाटनं, लोकार्पणम् च करिष्यति, तत्र एकं जनसमूहं अपि सम्बोधयिष्यति। एतासु परियोजनासु रेल-सम्पर्कः, नगरीय-आजीविका, विज्ञान-नवान्वेषणम्, स्वास्थ्यसेवा, नागरिकसेवा च सम्मिलिताः सन्ति, यस्य उद्देश्यं समावेशकवृद्धिः, जीवनस्य गुणवत्तायां परिष्कार: च अस्ति। प्रधानमन्त्री चतुर्णां रेलयानानां हरितध्वजं प्रदर्शयिष्यति येषु त्रीणि अमृतभारत् एक्स्प्रेस् रेलयानानि सन्ति। सः वीथि-विक्रेतृभ्यः वित्तीय-समावेशनं सुदृढीकरणाय पी एम् स्वनिधि-क्रेडिट्-कार्ड् इत्यस्य आरम्भं करिष्यति तथा च एकलक्ष-लाभार्थीनां कृते पी एम् स्वनिधि-ऋणस्य वितरणम् करिष्यति। विज्ञान-नवान्वेषणक्षेत्रे च श्रीमोदी सी. एस्.आई.आर्. - एन्.आई.आई.एस्.टि. नवान्वेषण-प्रौद्योगिकी-उद्यमशीलता-हब्

इत्यस्य शिलान्यासं करिष्यति। स्वास्थ्यसेवायां, सः श्रीचित्र-तिरुनाळ्-संस्थाने रेडियोसर्जरी-केन्द्रस्य शिलान्यासम् अपि करिष्यति, येन उन्नत-चिकित्सा-सेवा वर्धिता भविष्यति।

---------------------------------------------

<u>झारखण्ड माओवादी</u>

झारखण्ड-राज्ये, अद्य पश्चिम-सिंहभूम्-मण्डले नक्सल्-विरोधी-अभियाने सुरक्षाबलेन द्वन्द्वे दशतोप्यधिकाः माओवादिनः मारिताः। प्रातःकाले सी. पी. आई. (माओवादि) विद्रोहिणां विरुद्धं सुरक्षाप्रक्रियायां गोलिकाप्रहारम् आरब्धम्। मृतेषु वरिष्ठः माओवादी नेता पातिराम् माञ्झी, अथवा अनल दा सम्मिलितः आसीत्, यो हि एककोटि-रूप्यकाणां पारितोषिकं धारयति । सः गिरिडिह्-मण्डलस्य निवासी आसीत्।

---------------------------------------------

<u>जम्मू-दुर्घटना</u>

जम्मू-कश्मीर्-प्रदेशे डोडा-जनपदस्य खन्नी-टॉप इत्यत्र मार्गात् सैन्य-ट्रक्-यानम् अपक्रम्य खत्यां पतनेन दशसैनिकाः मृताः, एकादश जनाः च व्रणिता: अभवन्। चत्वारः घटनास्थले एव मृताः, षट् च पश्चात्। सेनया आरक्षि बलेन च संयुक्त-उद्धारकार्यम् तत्क्षणमेव प्रारब्धम्। व्रणिताः दश सैनिकाः उधमपुर-कमाण्ड-चिकित्सालयं प्रति वायुमार्गेण नीताः, एकः भद्रवाह्-उपमण्डलीय-चिकित्सालये निरीक्षणे अस्ति। उपराज्यपालः मनोज सिन्हा, मुख्यमन्त्री उमर अब्दुल्ला, रक्षामंत्री राजनाथ सिंहः च घटनायां शोकं प्रकटितवन्तः।

---------------------------------------------

<u>वाशिङ्ग्टन्- औषध-नीति</u>

औषध-नीति-कार्यकारी-समूहस्य त्रि-दिवसीय-उद्घाटन-सम्मेलनम् अद्य वाशिङ्ग्टन्-डी. सी. इत्यत्र समाप्तम्। जनवरी-मासस्य विंशति-दिनाङ्के समारब्धं सम्मेलनं कृत्रिम-ओपि-ओयिड्स्,

उदयोन्मुख-मादकद्रव्याणां पूर्वगामिः, डिजिटल्-मञ्चानां दुरुपयोगं च निवारयितुं सहयोगं सुदृढं कर्तुं केन्द्रितम् आसीत्।

-----------------------------------------------

## ट्रंप-दावोस

दावोस-नगरे विश्व-आर्थिक-मञ्चे अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रशंसितम्। श्रीमोदी घनिष्ठमित्रम् इति सम्बोधयन् अमेरिका-देशस्य राष्ट्रपतिः भारत-अमेरिका-देशयोः मध्ये व्यापारसमन्वयं भविष्यति इति आत्मविश्वासं प्रकटितवान्। एषा टिप्पणी तदा अभवत् यदा वाशिङ्गटन्-नवदिल्ली च व्यापार-व्यवहारस्य गतिरोधस्य निराकरणार्थं वार्तालापं निरन्तरं कुर्वन्तौ स्तः। सम्भाव्य-व्यापार-सन्धि-विषये प्रत्यक्षतया प्रश्नस्य उत्तरे अमेरिकादेशस्य राष्ट्रपतिः अवदत् यत् सः उत्तमः व्यवहारः करिष्यति इति।

-----------------------------------------------

## भारत-यूरोप

अग्रिमे सप्ताहे नवदिल्ल्यां यूरोपीय-सङ्घ-भारत-शिखरसम्मेलने नूतन-सुरक्षा-रक्षा-सहभागितायाः हस्ताक्षरेण, भारत-यूरोपीय-सङ्घयोः सामरिक-सम्बन्धः सुदृढः भवितुं सज्जः अस्ति। यूरोपीयसङ्घस्य विदेश-नीति-विभागस्य प्रमुखः काजा-कल्लास-इत्येषा फ्रान्स्-देशस्य स्ट्रास्बर्ग-नगरे यूरोपीयसंसदि अघोषितवती। सा अवोचत् यत्, इयं सन्धिः भारत-प्रशान्तक्षेत्रे स्थिरतायै केन्द्रीकृतं समुद्रीयसुरक्षायां, आतङ्कवाद-निरोधे, साईबर-सुरक्षायां, समुद्रीयक्षेत्र-जागरूकतायां च प्रमुखक्षेत्रेषु सहयोगं सुदृढं करिष्यति। यूरोपीय-सङ्घस्य विदेशनीति-प्रमुखः अवदत् यत् यूरोप्-देशः भारतेन सह शक्तियुतं नूतनं कार्यसूचीं दातुं सज्जः अस्ति, यूरोपीय-सङ्घः भारतस्य बृहत्तमेषु व्यापारसहभागिषु अन्यतमः अस्ति इति। अग्रिमे सप्ताहे यूरोपीय-आयोगस्य अध्यक्षस्य उर्सुला वॉन् डेर् लेयेन् इत्यस्य, यूरोपीय-परिषदः अध्यक्षस्य एन्तोनियो कोस्टा इत्यस्य च भारतयात्रायाः समये सहभागित्वेषु हस्ताक्षरं भविष्यति, यत्र ते गणतन्त्रदिवस-समारोहे मुख्यातिथी भविष्यतः। नेतारौ अस्मिन् मासे सप्तविंशति दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशतमे भारत-यूरोपीयसङ्घस्य शिखरसम्मेलने सह-अध्यक्षतां करिष्यतः।

---------------------------------------------

## सर्वोच्चन्यायाल: वसंत पञ्चमी

सर्वोच्चन्यायालयेन अद्य मध्यप्रदेशस्य धार-जनपदस्य विवादित-भोजशाला-कमल-मौला-मस्जिद इत्यत्र श्वः वसन्तपञ्चम्यवसरे सूर्योदयात् सूर्यास्तपर्यन्तं प्रार्थनां कर्तुं हिन्दुसमुदायाय अनुमतिः प्रदत्ता, तस्मिन् दिने मुस्लिम्-समुदायेभ्यः अपराह्णे एकवादनतः त्रिवादन पर्यन्तं प्रार्थनां कर्तुं अनुमतिः प्रदत्ता अस्ति। सर्वोच्चन्यायालयेन निर्दिष्टं यत् प्रार्थनायै आगतानां मुस्लिम्-समुदायस्य जनानां सूचीं जनपद-प्रशासनं प्रति दातव्यम् इति। उभौ समुदायौ शुक्रवासरे भोजशाला-परिसरे धार्मिक-अनुष्ठानाय अनुमतिं याचितवन्तौ, तदैव वसन्तपञ्चमी-अवसरे सरस्वती-पूजा अपि आचर्यते। भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्ति जॉयमाल्या बागची, न्यायमूर्ति विपुल् एम पञ्चोली च इत्येतेषां पीठेन उभयोः पक्षयोः मध्ये सामञ्जस्यं स्थापयितुं, राज्येन जनपदप्रशासनेन सह विधि-व्यवस्थां स्थापयितुं सहयोगं दातुं च आदिष्टम्। न्यायालयेन जनपदप्रशासनं पूजास्थले विधि-व्यवस्थायै निर्दिष्टम् अस्ति।

---------------------------------------------

## प्रधानमन्त्री-ग्राम-सडक-योजना

प्रधानमन्त्री-ग्राम-सडक-योजनायाः चतुर्थ-चरणस्य अन्तर्गतं जम्मू-कश्मीर, छत्तीसगढ, उत्तराखण्ड, राजस्थान, हिमाचलप्रदेश, सिक्किम इत्येतेषु प्रदेशेषु दशसहस्र कि. मी. तोप्यधिकाः मार्ग-परियोजनाः सर्वकारेण अनुमोदिताः सन्ति। एते मार्गाः पूर्वं पृथग्भूताः प्रायः सप्तत्यधिक द्विशतोत्तर त्रिसहस्र निवासस्थानानि योजयन्ति, येन आवश्यकसेवानां प्राप्तिः वर्धते।

---------------------------------------------

## बैडमिण्टन्

बैडमिण्टन्-क्रीडायां भारतीय-क्रीडकौ पी. वी. सिन्धु, लक्ष्यसेन: च अद्य इण्डोनेशिया-मास्टर्स्-प्रतियोगितायाः प्रागुपान्त्यचक्रीय द्वन्द्वे प्रविष्टवन्तौ। लक्ष्यः पुरुष-एकल प्र-प्रागुपान्त्यचक्रीय द्वन्द्वे

हांगकांग-देशस्य जेसन गुनावन इत्येतं एकविंशति-दश, एकविंशति-एकादश इत्याङ्कैः पराजितवान्।

।। इति वार्ताः ।।